# श्री छिन्नमस्ता कवचं

### श्री छिन्नमस्ता कवचं

देव्युवाच |
कथिताश्छिन्नमस्ताया या या विद्याः सुगोपिताः |
त्वया नाथेन जीवेश श्रुताश्चाधिगता मया || 1 ||

इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं |
त्रैलोक्यविजयं नाम कृपया कथ्यतां प्रभो || 2 ||

भैरव उवाच |
शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते |
त्रैलोक्यविजयं नाम कवचं सर्वमोहनं || 3 ||

सर्वविद्यामयं साक्षात्सुरात्सुरजयप्रदं |
धारणात्पठनादीशस्त्रैलोक्यविजयी विभुः || 4 ||

ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः |
कर्ता पाता च संहर्ता भुवनानां सुरेश्वरि || 5 ||

न देयं परशिष्येभ्योऽभक्तेभ्योऽपि विशेषतः |
देयं शिष्याय भक्ताय प्राणेभ्योऽप्यधिकाय च || 6 ||

देव्याश्च च्छिन्नमस्तायाः कवचस्य च भैरवः |
ऋषिस्तु स्याद्विराट् छंदो देवता च्छिन्नमस्तका || 7 ||

त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्तितः |
हुंकारो मे शिरः पातु छिन्नमस्ता बलप्रदा || 8 ||

ह्रां ह्रूं ऐं त्र्यक्षरी पातु भालं वक्त्रं दिगंबरा |
श्रीं ह्रीं ह्रूं ऐं दृशौ पातु मुंडं कर्त्रिधरापि सा || 9 ||

सा विद्या प्रणवाद्यंता श्रुतियुग्मं सदाऽवतु |
वज्रवैरोचनीये हुं फट् स्वाहा च ध्रुवादिका || 10 ||

घ्राणं पातु च्छिन्नमस्ता मुंडकर्त्रिविधारिणी |
श्रीमायाकूर्चवाग्बीजैर्वज्रवैरोचनीय हूं || 11 ||

हूं फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी |
स्वपार्श्वे वर्णिनी चासृग्धारां पाययती मुदा || 12 ||

वदनं सर्वदा पातु च्छिन्नमस्ता स्वशक्तिका |
मुंडकर्त्रिधरा रक्ता साधकाभीष्टदायिनी || 13 ||

वर्णिनी डाकिनीयुक्ता सापि मामभितोऽवतु |
रामाद्या पातु जिह्वां च लज्जाद्या पातु कंठकं || 14 ||

कूर्चाद्या हृदयं पातु वागाद्या स्तनयुग्मकं |
रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी || 15 ||

माययया पुटिता पातु नाभिदेशे दिगंबरा |
कूर्चेण पुटिता देवी पृष्ठदेशे सदाऽवतु || 16 ||

वाग्बीजपुटिता चैषा मध्यं पातु सशक्तिका |
ईश्वरी कूर्चवाग्बीजैर्वज्रवैरोचनीय हूं || 17 ||

हूं फट् स्वाहा महाविद्या कोटिसूर्यसमप्रभा |
छिन्नमस्ता सदा पायादूरुयुग्मं सशक्तिका || 18 ||

ह्रीं हूं वर्णिनी जानुं श्रीं ह्रीं च डाकिनी पदं |
सर्वविद्यास्थिता नित्या सर्वांगं मे सदाऽवतु || 19 ||

प्राच्यां पायादेकलिंगा योगिनी पावकेऽवतु |
डाकिनी दक्षिणे पातु श्रीमहाभैरवी च मां || 20 ||

नैर्ऋत्यां सततं पातु भैरवी पश्चिमेऽवतु |
इंद्राक्षी पातु वायव्येऽसितांगी पातु चोत्तरे || 21 ||

संहारिणी सदा पातु शिवकोणे सकर्त्रिका |
इत्यष्टशक्तयः पांतु दिग्विदिक्षु सकर्त्रिकाः || 22 ||

क्रीं क्रीं क्रीं पातु सा पूर्वं ह्रीं ह्रीं मां पातु पावके |
हूं हूं मां दक्षिणे पातु दक्षिणे कालिकावतु || 23 ||

क्रीं क्रीं क्रीं चैव नैर्ऋत्यां ह्रीं ह्रीं च पश्चिमेऽवतु |
हूं हूं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे || 24 ||

महाकाली खड्गहस्ता रक्षःकोणे सदावतु |
तारो माया वधूः कूर्चं फट् कारोऽयं महामनुः || 25 ||

खड्गकर्त्रिधरा तारा चोर्ध्वदेशं सदाऽवतु |
ह्रीं स्त्रीं हूं फट् च पाताले मां पातु चैकजटा सती |
तारा तु सहिता खेऽव्यान्महानीलसरस्वती || 26 ||

इति ते कथितं देव्याः कवचं मंत्रविग्रहं |
यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः स्मृतः || 27 ||

सुरासुर मुनींद्राणां कर्ता हर्ता भवेत्स्वयं |
यस्याज्ञया मधुमती याति सा साधकालयं || 28 ||

भूतिन्याद्याश्च डाकिन्यो यक्षिण्याद्याश्च खेचराः |
आज्ञां गृह्णंति तास्तस्य कवचस्य प्रसादतः || 29 ||

एतदेव परं ब्रह्म कवचं मन्मुखोदितं |
देवीमभ्यर्च गंधाद्यैर्मूले नैव पठेत्सकृत् || 30 ||

संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् |
भूर्जे विलिखितं चैतद्गुटिकां कांचनस्थितां || 31 ||

धारयेद्दक्षिणे बाहौ कंठे वा यदि वान्यतः |
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् || 32 ||

तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनांबुजे |
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यांति सौम्यतां || 33 ||

इदं कवचमज्ञात्वा यो भजेच्छिन्नमस्तकां |
सोऽपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरं || 34 ||

इति श्रीभैरवतंत्रे भैरवभैरवीसंवादे त्रैलोक्यविजयं नाम छिन्नमस्ताकवचं संपूर्णं |